# rakArAdi shrI rAmAShTottarashatanAmastotram

# रकारादि श्रीरामाष्टोत्तरशतनामस्तोत्रम्

## Document Information

Text title : rakArAdi rAmAShTottarashatanAmastotram

File name : rakArAdirAma108nAmastotram.itx

Category : aShTottarashatanAma, vishhnu, dashAvatAra, paNDita-bellaMkoNDa-rAmarAya-kavIndra, vishnu

Location : doc_vishhnu

Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA

Latest update : January 24, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# रकारादि श्रीरामाष्टोत्तरशतनामस्तोत्रम्

श्री हयग्रीवाय नमः ।
हरिः ॐ

रामो राजीवपत्राक्षो राकाचन्द्रनिभाननः ।
रात्रिञ्चरार्दितक्षोणी परितापविनाशनः ॥ १॥

राजीवनाभो राजेन्द्रो राजीवासनसंस्तुतः ।
राजराजादिदिक्पालमौलि माणिक्यदीपितः ॥ २॥

राघवान्वयपाथोधिचन्द्रो राकेन्दुसद्यशाः ।
रामचन्द्रो राघवेन्द्रो राजीवरुचिराननः ॥ ३॥

राजानुजामन्दिरोरा राजीवविलसत्पदः ।
राजीवहस्तो राजीवप्रियवंशकृतोदयः ॥ ४॥

रात्रिनव्याम्बुभृन्मूर्ती राजांशुरुचिरस्मितः ।
राजीवहारो राजीवधारी राजीवजाप्रियः ॥ ५॥

राघवोत्सङ्गविद्योतो राकेन्द्वयुतभास्वरः ।
राजलेखानखाङ्कूरो राजीवप्रियभूषणः ॥ ६॥

राजराजन्मणीभूषो राराजद्भ्रमरालकः ।
राजलेखाभसीमन्तो राजन्मृगमदाङ्कनः ॥ ७॥

राजहीरलसच्छ्रोत्रो राजीवकरगामृतः ।
रत्नकाञ्चीधरो रम्यो रत्नकाञ्चनकङ्कणः ॥ ८॥

रणत्काञ्चनमञ्जीरो रञ्जिताखिलभूतलः ।
राराजत्कुन्दरदनो रम्यकण्ठो रतव्रजः ॥ ९॥

रञ्जिताद्भुतगाधेयो रात्रिञ्चरसतीहरः ।
रात्रिञ्चरभयत्त्रातगाधेय सवनोत्तमः ॥ १०॥

रााजच्चरणाम्भोजरजःपूतमुनिप्रियः ।
राजराजसुहृच्चापभेदनो राजपूजितः ॥ ११॥

रमारामाकराम्भोज मालोन्मीलितकण्ठमः ।
रमाकराब्जमारन्दबिन्दुमुक्ताफलावृतः ॥ १२॥

रत्नकङ्कणनिध्वानमिषल्लक्ष्मीस्तुतिश्रुतिः ।
रमावामदृगन्तालि व्याप्तदुर्लक्ष्यविग्रहः ॥ १३॥

रामतेजस्समाहर्ता रामसोपानभञ्जनः ।
राघवाज्ञाकृतारण्यवासो रामानुजार्चितः ॥ १४॥

रक्तकञ्जातचरणो रम्यवल्कलवेष्टितः ।
रात्र्यम्बुदजटाभारो रम्याङ्गश्रीविभूषणः ॥ १५॥

रणच्चापगुणोरक्तमुनित्राणपरायणः ।
रात्रिञ्चरगणप्राणहर्ता रम्यफलादनः ॥ १६॥

रात्रिञ्चरेन्द्रभगिनीकर्णनासोष्टभेदनः ।
रातमायामृगप्राणो रावणाहृतसत्प्रियः ॥ १७॥

राजीवबन्धुपुत्राप्तो राजदेवसुतार्धनः ।
रक्तश्रीहनुमद्वाहो रत्नाकरनिबन्धनः ॥ १८॥

रुद्धरात्रिञ्चरावासो रावणादिविमर्दनः ।
रामासमालिङ्गिताङ्को रावणानुजपूजितः ॥ १९॥

रत्नसिंहासनासीनो राज्यपट्टाभिषेचनः ।
राजनक्षत्रवलयवृत राकेन्दुसुन्दरः ॥ २०॥

राकेन्दुमण्डलच्चत्रो राजांशूत्करचामरः ।
राजर्षिगणसंवीतो रञ्जितप्लवगाधिपः ॥ २१॥

रमादृञ्मालिकानीला नीराजितपदाम्बुजः ।
रामतत्त्वप्रवचनो राजराजसखोदयः ॥ २२॥

राजबिम्बाननागाननर्तनामोदितान्तरः ।
राज्यलक्ष्मीपरीरम्भसम्भृताद्भुतकण्टकः ॥ २३॥

रामायणकथामालानायको राष्ट्रशोभनः ।
राजमालामौलिमालामकरन्दप्लुताङ्घ्रिकः ॥ २४॥

राजताद्रिमहाधीरो राद्धदेवगुरुद्विजः ।
राद्धभक्ताशयारामो रमिताखिलदैवतः ॥ २५॥

रागी रागविहीनात्मभक्तप्राप्यो रसात्मकः ।
रसप्रदो रसास्वादो रसाधीशो रसातिगः ॥ २६॥

रसनापावनाभिख्यो रामनामामृतोदधिः ।
राजराजीवमित्राक्षो राजीवभवकारणम् ॥ २७॥

रमारामाशयानन्द दुग्धसागरचन्द्रमाः ।
रामभद्रो राजमानो राजीवप्रियबिम्बगः ॥ २८॥

रमारामाभुजलता कण्ठालिङ्गनमङ्गलः ।
रामसूरिहृदम्भोधिवृत्तिवीचीविहारवान् ॥ २९॥

॥ इति विश्वावसु चैत्रशुद्ध नवमी दिने रामेण लिखितं
समर्पितं च रामभद्राय सद्विजयते तराम्
रकारादि श्री रामनामाष्टोत्तरशतम् ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

---

---

*rakArAdi shrI rAmAShTottarashatanAmastotram*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*